# ॥ श्रीगुरुस्तोत्रम् ॥

.. shrIgurustotram ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : gurustotra from parameshvaratantra
File name : gurustotraparameshvaratantra.itx
Location : doc_deities_misc
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA
Source : Brihadvijnana Parameshvaratantra
Latest update : January 4, 2015
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ श्रीगुरुस्तोत्रम् ॥

बृहद्विज्ञान परमेश्वरतन्त्रार्गतम्

॥ ॐ नमः श्रीनाथाय ॥

॥ श्रीमहादेव्युवाच ॥

गुरोर्मन्त्रस्य देवस्य धर्मस्य तस्य एव वा ।
विशेषस्तु महादेव! तद् वदस्व दयानिधे ॥

॥ श्रीमहादेव उवाच ॥

जीवात्मनं परमात्मनं दानं ध्यानं योगो ज्ञानम् ।
उत्कलकाशीगङ्गामरणं न गुरोरधिकं न गुरोरधिकम् ॥ १॥

प्राणं देहं गेहं राज्यं स्वर्गं भोगं योगं मुक्तिम् ।
भार्यामिष्टं पुत्रं मित्रं न गुरोरधिकं न गुरोरधिकम् ॥ २॥

वानप्रस्थं यतिविधधर्मं पारमहंस्यं भिक्षुकचरितम् ।
साधोःसेवां बहुसुखभुक्तिं न गुरोरधिकं न गुरोरधिकम्॥ ३॥

विष्णोभक्तिं पूजनरक्तिं वैष्णवसेवां मातरिभक्तिम् ।
विष्णोरिव पितृसेवनयोगं न गुरोरधिकं न गुरोरधिकम् ॥ ४॥

प्रत्याहारं चेन्द्रिययजनं प्राणायामं न्यासविधानम् ।
इष्टे पूजा जप तपभक्तिर्न न गुरोरधिकं न गुरोरधिकम् ॥ ५॥

काली दुर्गा कमला भुवना त्रिपुरा भीमा बगला पूर्णा ।
श्रीमातङ्गी धूमा तारा न गुरोरधिकं न गुरोरधिकम् ॥ ६॥

मात्स्यं कौर्मं श्रीवाराहं नरहरिरूपं वामनचरितम् ।
नरनारायणचरितं योगं न गुरोरधिकं न गुरोरधिकम् ॥ ७॥

श्रीभृगुदेवं श्रीरघुनाथं श्रीयदुनाथं बौद्धं कल्क्यम् ।
अवतारा दश वेदविधानं न गुरोरधिकं न गुरोरधिकम् ॥ ८॥

गङ्गा काशी काञ्ची द्वारा मायाऽयोध्याऽवन्ती मथुरा ।
यमुना रेवा पुष्करतीर्थं न गुरोरधिकं न गुरोरधिकम् ॥ ९॥

गोकुलगमनं गोपुररमणं श्रीवृन्दावनमधुपुररटनम् ।
एतत् सर्वंसुन्दरि! मातर्न गुरोरधिकं न गुरोरधिकम् ॥ १०॥

तुलसीसेवा हरिहरभक्तिः गङ्गासागरसङ्गममुक्तिः ।
किमपरमधिकं कृष्णेभक्तिर्न गुरोरधिकं न गुरोरधिकम् ॥ ११॥

एतत्सोत्रं पठति च नित्यं मोक्षज्ञानी सोऽपि च धन्यम् ।
ब्रह्माण्डान्तर्यद्यद्ध्येयं न गुरोरधिकं न गुरोरधिकम् ॥ १२॥

॥ बृहद्विज्ञान परमेश्वरतन्त्रे त्रिपुराशिवसंवादे श्रीगुरोःस्तोत्रम् ॥

Proofread by Nat Natarajan nat.natarajan at gmail.com, NA

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. shrIgurustotram ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*